त्वद्भक्तियुक्तो यो बालो जीवन्मुक्तश्च सन्ततम् ।
तद्भक्तिहीनो मूर्खश्च जीवन्नपि मृतो हि सः ॥
किन्तज्जपेन तपसा यज्ञेन पूजनेन च ।
कृष्णभक्तिविहीनस्य मूर्खस्य जीवनं वृथा ॥
येनात्मना जीवितश्च तमेव नहि मन्यते ।
यावदात्मा शरीरेऽस्ति तावत् स शक्तिसंयुतः ॥
पश्चाद्यान्ति गते तस्मिन् न स्वतन्त्राश्च शक्तयः ।
स च त्वञ्च महाभाग सर्व्वात्मा प्रकृतेः परः ॥
स्वेच्छामयश्च सर्व्वेभ्यो ब्रह्मज्योतिः सनातनः ।
इत्युक्त्वा बालकस्तत्र विरराम च नारद ॥
उवाच कृष्णः प्रत्युक्तिं मधुरां श्रुतिसुन्दरीम् ॥
श्रीकृष्ण उवाच ।
सुचिरं सुस्थिरं तिष्ठ यथाहं त्वं तथा भव ।
ब्रह्मणोऽसंख्यपाते च पातस्ते न भविष्यति ॥
अंशेन प्रतिब्रह्माण्डे त्वञ्च क्षुद्रविराड्भव ।
त्वन्नाभिपद्मे ब्रह्मा च विश्वस्रष्टा भविष्यति ॥
ललाटे ब्रह्मणश्चैव रुद्राश्चैकादशैव तु ।
शिवांशेन भविष्यन्ति सृष्टिसंहारणाय वै ॥
कालाग्निरुद्रस्तेष्वेको विश्वसंहारकारकः ।
पाता विष्णुश्च विषयी क्षुद्रांशेन भविष्यति ॥
मद्भक्तियुक्तः सततं भविष्यसि वरेण मे ।
ध्यानेन कमनीयं मां नित्यं द्रक्ष्यसि निश्चितम् ॥
मातरं कमनीयाञ्च मम वक्षःस्थलस्थिताम् ।
यामि लोकं तिष्ठ वत्सेत्युक्त्वा सोऽन्तरधीयत ॥
गत्वा स्वलोकं ब्रह्माणं शङ्करं स उवाच ह ।
स्रष्टारं स्रष्टुमीशञ्च संहर्त्तारञ्च तत्क्षणम् ॥
श्रीकृष्ण उवाच ।
सृष्टिं स्रष्टुं गच्छ वत्स नाभिपद्मोद्भवो भव ।
महाविराड्लोमकूपे क्षुद्रस्य च विधे शृणु ॥
गच्छ वत्स महादेव ब्रह्मभालोद्भवो भव ।
अंशेन च महाभाग स्वयञ्च सुचिरं तपः ॥
इत्युक्त्वा जगतां नाथो विरराम विधिस्ततः ।
जगाम ब्रह्मा तं नत्वा शिवश्च शिवदायकः ॥
महाविराड्लोमकूपे ब्रह्माण्डे गोलोके जले ।
बभूव च विराट् क्षुद्रो विराडंशेन सांप्रतम् ॥
श्यामो युवा पीतवासाः शयानो जलतल्पके ।
ईषद्धास्यः प्रसन्नास्यो विश्वव्यापी जनार्द्दनः ॥
तन्नाभिकमले ब्रह्मा बभूव कमलोद्भवः ।
संभूय पद्मदण्डञ्च बभ्राम युग-लक्षकम् ॥
नान्तं जगाम दण्डस्य पद्मनाभस्य पद्मजः ।
नाभिजस्य च पद्मस्य चिन्तामाप पिता तव ॥
स्वस्थाने पुनरागत्य दध्यौ कृष्णः पदाम्बुजम् ।
ततो ददर्श क्षुद्रन्तं कालेन दिव्यचक्षुषा ॥
शयानं जलतल्पे च ब्रह्माण्डे गोलकावृते ॥
यल्लोमकूपे ब्रह्माण्डं तञ्च तत् परमेश्वरम् ।
श्रीकृष्णञ्चापि गोलोकं गोपगोपीसमन्वितम् ॥
तं संस्तूय वरं प्राप ततः सृष्टिञ्चकार सः ।
बभूवुर्ब्रह्मणः पुत्त्रा मानसाः सनकादयः ॥
ततो रुद्राः कपालाच्च शिवांशैकादश स्मृताः ।
बभूव पाता विष्णुश्च क्षुद्रस्य वामपार्श्वतः ॥
चतुर्भुजश्च भगवान् श्वेतद्वीपनिवासकृत् ।
क्षुद्रस्य नाभिपद्मे च ब्रह्मा विष्णुं ससर्ज्ज च ॥
स्वर्गं मर्त्त्यञ्च पातालं त्रिलोकं सचराचरम् ।
एवं सर्व्वं लोमकूपे विश्वं प्रत्येकमेव च ॥
प्रतिविश्वे क्षुद्रविराट् ब्रह्मविष्णुशिवादयः ।
इत्येवं कथितं वत्स श्रीकृष्णकीर्त्तनं परम् ॥
सुखदं मोक्षदं सारं किं भूयः श्रोतुमिच्छसि ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३ अध्यायः ॥
स्वायम्भुवमनुः । यथा,—
“गतेषु तेषु सृष्ट्यर्थं प्रणामावनतामिमाम् ।
उपयेमे स विश्वात्मा शतरूपामनिन्दिताम् ॥
सम्बभूव तया सार्द्धमतिकामातुरो विभुः ।
सलज्जां चकमे देवः कमलोदरमन्दिरे ॥
यावदब्दशतं दिव्यं यथान्यः प्राकृतो जनः ।
ततः कालेन महता ततः पुत्त्रोऽभवन्मनुः ॥
स्वायम्भुव इति ख्यातः स विराडिति नः श्रुतम् ।
तद्रूपगुणसामान्यादधिपूरुष उच्यते ॥
वैराजा यत्र ते जाता बहवः शंसितव्रताः ।
स्वायम्भुवा महाभागा सप्त सप्त तथापरे ॥
स्वारोचिषाद्याः सर्व्वे ते ब्रह्मतुल्याः स्वरूपिणः ।
औत्तमिप्रमुखास्तद्वद्येषां त्वं सप्तमोऽधुना ॥”
इति मात्स्ये ३ अध्यायः ॥
विराटः, पुं, देशविशेषः । इति शब्दरत्नावली ॥ (अत्रैव पञ्चपाण्डवाः सह द्रौपद्या अज्ञातसुषितवन्तः । यथा, महाभारते ।४ । १ । १ ।
“कथं विराटनगरे मम पूर्व्वपितामहाः ।
अज्ञातवासमुषिता दुर्य्योधनभयार्द्दिताः ॥”)
तद्देशीयराजा । यथा,—
“अत्र शूरा महेष्वासा भीमार्ज्जुनसमा युधि ।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥”
इति श्रीभगवद्गीतायाम् १ अध्यायः ॥
विराटकः, पुं, राजपट्टः । इति हेमचन्द्रः ॥
विराटजः, पुं, (विराटे जायते इति । जन् + डः ।) विराटदेशीयहीरकः । तत्पर्य्यायः । राजपट्टः २ राजावर्त्तः ३ । इति हेमचन्द्रः ॥ विराटराजजाते, त्रि ॥ (यथा, महाभारते । १४ । ६२ । ८ ।
“सुबहूनि च राजेन्द्र दिवसानि विराटजा ।
नाभुङ्क्त पतिदुःखार्त्ता तदाभूत्करुणं महत् ॥”)
विराणी, [न्] पुं, हस्ती । इति शब्दमाला ॥
विराधः, पुं, (विराधयति लोकान् पीड़यतीति । वि + राध + अच् ।) राक्षसभेदः । यथा,—
“लक्ष्मणस्य तु तद्वाक्यं श्रुत्वा रामं ततोऽब्रवीत् ।
पिता मेऽभूत् सुपर्ज्जन्यो माता मे च शतह्रदा ॥
विराध इति मामाहुः पृथिव्यां सर्व्वराक्षसाः ।
उत्सृज्य प्रमदामेनां पलायेतां पराङ्मुखौ ॥
तच्छ्रुत्वा राममाहेदं लक्ष्मणः किं प्रतीक्षसे ॥
इत्युक्तो लक्ष्मणो वीर आनम्य सुमहद्धनुः ।
उत्ससर्ज्ज शरं घोरं कालदण्डोपमं ततः ॥
तच्छरीरं महाकायं भित्त्वा पातालमाविशत् ॥
पपाताशु गतप्राणः सफेनं रुधिरं वमन् ।
ततोऽसौ राममाहेदं प्राञ्जलिर्विनयान्वितः ॥
तुम्बुरुर्नाम गन्धर्व्वः प्रविष्टो राक्षसीं तनुम् ।
अभिशापादहं घोरं शप्तो वैश्रवणेन वै ॥
प्रसाद्यमानः स मया प्रावोचन्मां पुनः पुनः ।
यदा दाशरथी रामो भविष्यति महाबलः ॥
शापस्यान्तोऽभविष्यत्ते तेन रामेण संयुगे ।
प्रसादात्तव मुक्तोऽहं गमिष्यामि स्वमालयम् ॥”
इति वह्निपुराणे स्वर्णयक्षाकर्णनासिकोत्कर्त्तनं नामाध्यायः ॥
विराधनं, क्ली, (वि + राध + ल्युट् ।) पीड़ा । इति शब्दरत्नावली ॥
विराधानं, क्ली, पीड़ा । इति शब्दरत्नावली । विबाधानमिति च पाठः ॥
विरामः, पुं, (वि + रम + घञ् ।) शेषः । निवृत्तिः । विरतिः । तत्पर्य्यायः । अवसानः २ सातिः ३ । इति जटाधरः ॥ मध्यम् ४ । इति त्रिकाण्डशेषः ॥ (यथा, मनौ । २ । ७३ ।
“अध्येष्यमाणस्तु गुरुं नित्यकालमतन्द्रितः ।
अधीष्व भो इति ब्रूयात् विरामोऽस्त्विति चारमेत् ॥”)
परवर्णाभावः । इति व्याकरणम् ॥ (यथा, पाणिनौ ।१।४। ११० । “विरामोऽवसानम् ॥”)
विरालः, पुं, विड़ालः । इत्यमरटीका ॥
विरावः, पुं, (वि + रु + घञ् ।) शब्दः । इत्यमरः ॥ (यथा, महाभारते । ३ । १४६ । ६४ ॥
“सिंहनादभयत्रस्तैः कुञ्जरैरपि भारत ! ।
मुक्तो विरावः सुमहान् पर्व्वतो येन पूरितः ॥”
इन्द्रप्रदत्ताश्वान्यतरः । यथा, महाभारते । ३ । ६६ । १७ ।
“विरावश्च सुरावश्च तस्मिन् युक्तौ रथे हयौ ॥”)
विरावी, [न्] त्रि, विरावविशिष्टः । विरावो विद्यतेऽस्येति इन्प्रत्ययेन निष्पन्नः ॥ (यथा, बृहत्संहितायाम् । ५३ । ६ ।
“दिशि शान्तायां शकुनो मधुरविरावी यदा तदा वाच्यः ।
अर्थस्तस्मिन् स्थाने गृहेश्वराधिष्ठितेऽङ्गेवा ॥”)
विरिक्तः, त्रि, कृतविरेकः । यथा,—
“दुर्विरिक्तस्य नाभेस्तु स्तब्धता कुक्षिशूलकृत् ।
पुरीषवातसङ्गश्च कण्डुमण्डलगौरवम् ॥”
इति भावप्रकाशः ॥
विरिञ्चः, पुं, ब्रह्मा । (यथा, भागवते ।८।५।३६।
“बलान्महेन्द्रस्त्रिदशाः प्रसादा-
न्मन्योर्गिरीशो धिषणाद्विरिञ्चः ॥”)
विष्णुः । शिवः । इति शब्दरत्नावली ॥
विरिञ्चनः, पुं, ब्रह्मा । इति हेमचन्द्रः ॥
विरिञ्चिः, पुं, शिवः । विष्णुः । विधाता । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । १६ । १७ ।
“एवमस्त्विति तं देवाः पितामहमथाब्रुवन् ।
उक्त्वैवं वचनं देवान् विरिञ्चिस्त्रिदिवं ययौ ॥”)
विरिब्धः, पुं, स्वरः । इति मुग्धबोधव्याकरणम् ॥
विरुदः, पुं, गुणोत्कर्षादिवर्णनम् । यदुक्तम् ।
“वाणिकः कम्पितश्चेति विरुदो द्विविधो मतः ।
संयुक्तनियमो ह्यत्र वर्णितः पूर्व्ववद्बुधैः ॥